तपस्यं, क्ली, (तपसि ग्रीष्मे भवम् । तपस्+यत् ।) कुन्दपुष्पम् । इति शब्दचन्द्रिका ॥ (तपश्चरतीति । तपस्+क्वौ क्यङ् । ततो भावे यक् । तपश्चरणम् । यथा, महाभारते । १३।१०।१३ ।
"अथास्य बुद्धिरभवत् तपस्ये भरतर्षभ ! ॥")

तपस्यः, पुं, (तपसि माघे साधुः । तपस्+"तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) फाल्गुनमासः । इत्यमरः । १ । ४ । १५ । (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये । "तत्र माघादयो द्वादशमासाः द्विमासिकमृतुं कृत्वा षड़ृतवो भवन्ति । ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः । तेषां तपस्तपस्यौ शिशिरः ॥") अर्ज्जुनः । इति हेमचन्द्रः ॥ (तामसस्य मनोः पुत्त्रविशेषः । यथा, हरिवंशे । ७ । २४ ।
"द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोशनः ।
तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः ।
तामसस्य मनोरेते दश पुत्त्रा महाबलाः ॥")

तपस्या, स्त्री, (तपश्चरतीति । "कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरोः ।" ३ । १ । १५ । इति क्यङ् । ततः "अ प्रत्ययात् ।" ३ । ३ । १०२ । इति अ ततष्टाप् ।) तपः । तत्पर्य्यायः । व्रतादानम् २ परिस्पन्दा ३ नियमस्थितिः ४ । इति हेमचन्द्रः ॥ व्रतचर्य्या ५ । इति मेदिनी ॥

तपस्विनी, स्त्री, जटामांसी । इत्यमरः । २ । ४ । १३४ । (तपस्वितुल्यजटाद्युक्तत्वादस्यास्तथात्वम् । यथा, वैद्यकरत्नमालायाम् ।
"नलदं नन्दिनी पेषी मांसी कृष्णजटा जटी ।
किरातिनी च जटिला लोमशा तु तपस्विनी ॥")
कटुरोहिणी । इति हेमचन्द्रः ॥ महाश्रावणिका । इति भावप्रकाशः ॥ (तपोऽस्या अस्तीति । तपस्+"तपःसहस्राभ्यां विनीनी ।" ५ । २ । १०२ । इति विनिः । ततः स्त्रियां ङीप् ।) तपोयुक्ता स्त्री ॥ (यथा, रामायणे । ३ । २ । ७ ।
"भर्त्तां स च महाहर्त्तां विह्नां शुद्धां तपस्विनीम् ।
अगस्त्यां महाभागां सर्व्वभूतहिते रताम् ॥"
दीना । दुःखिता । यथा, भागवते । १।९।४४ ।
"ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम् ।
पितरं सान्त्वयामास गान्धारीञ्च तपस्विनीम् ॥"
पतिव्रता । यथा, नैषधे । १ । १३५ ।
"मदेकपुत्त्रा जननी जरातुरा
नवप्रसूतिर्व्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्द्दय-
न्नहो विधे ! त्वां करुणा रुणद्धि न ॥"
"वरटा हंसी मम स्त्री, नवा नूतना प्रसूतिः प्रसवो यस्यास्तादृशी सापि स्वतो जीवितुमसमर्था तर्हि पत्यन्तरेण तस्या जीविका भवेदित्यपि निषेधयति यतस्तपस्विनी पतिव्रता मम मरणानन्तरं पत्यन्तराश्रयणाभावात् तस्या जीवनं शिशूनां पोषणञ्च दुर्घटमेव भवेदिति भावः ॥" इति तट्टीका ॥)

तपस्विपत्रः, पुं, (तपस्विप्रियं पत्रमस्य ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥

तपस्वी, [न्] त्रि, (तपोऽस्यास्तीति । तपस्+"तपःसहस्राभ्यां विनीनी ।" ५ । २ । १०२ । इति विनिः ।) तपोयुक्तः । तत्पर्य्यायः । तापसः २ पारिकाङ्क्षी ३ । इत्यमरः ।२।७।४२॥ पारकाङ्क्षी ४ पारिकाङ्क्षकः ५ । इति शब्दरत्नावली ॥ तपोधनः ६ । (यथा, मनुः । ४ । १६२ ।
"न हिंस्याद्ब्राह्मणान् गाश्च सर्व्वांश्चैव तपस्विनः ॥")
अनुकम्प्यः । इति मेदिनी । ने, १८५ ॥

तपस्वी, [न्] पुं, (तपस्+अस्त्यर्थे विनिः ।) नारदः । इति शब्दरत्नावली ॥ मत्स्यविशेषः । तपस्या माछ इति भाषा । तत्पर्य्यायः । तपःकः २ पेटकः ३ पेटः ४ । इति शब्दचन्द्रिका ॥ (चाक्षुषस्य मनोः पुत्त्रविशेषः । यथा, हरिवंशे । २ । १८ ।
"ऊरुः पुरुः शतद्युम्नस्तपस्वी सत्यवान् कविः ॥")
घृतकरञ्जवृक्षः । इति राजनिर्घण्टः ॥

तपाः, [स्] पुं, (तपत्यस्मिन्निति । तप+असुन् ।) ग्रीष्मः । इत्यमरटीकायां नयनानन्दः ॥ माघमासः । शिशिरकालः । इति मेदिनी । से, २४ ॥ (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये ।
"तेषां तपस्तपस्यौ शिशिरः ॥")

तपात्ययः, पुं, (तपस्य ग्रीष्मस्य अत्ययो यत्र ।) वर्षाकालः । इति हेमचन्द्रः । २।७१ ॥ (यथा, कुमारे । ५ । २३ ।
"तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणममुञ्चदूर्द्ध्वगम् ॥")

तपितं, त्रि, (तप्यते स्मेति । तप दाहे+क्तः ।) तप्तम् । इति द्विरूपकोषः ॥ (यथा, हरिवंशे । २३४ । २९ ।
"तपितकनकबिन्दुपिङ्गलाक्षो
दितितनयोऽसुरसैन्ययुद्धनेता ॥")

तपुः, [स्] पुं, (तपति तापयतीति वा । तप+"अर्त्तिपृवपीति ।" उणां । २ । ११८ । इति उसिः ।) अग्निः । सूर्य्यः । इत्युणादिकोषः ॥ (शत्रुः । इत्युज्ज्वलदत्तः ॥ तापयुक्ते तापने च, त्रि । यथा, ऋग्वेदे । १ । ३६ । १६ ।
"तपुर्जम्भो यो अग्नभुक् ॥")

तपोधनः, पुं, (तप एव धनं यस्य ।) तपस्वी । इति मेदिनी ॥ (यथा, मनुः । ११ । २४२ ।
"यत्किञ्चिदेनः कुर्व्वन्ति मनोवाङ्मूर्त्तिभिर्ज्जनाः ।
तत् सर्व्वं निर्द्दहन्त्याशु तपसैव तपोधनाः ॥")
दमनकवृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः ।
"उक्तो दमनको दान्तो मुनिपुत्त्रस्तपोधनः ।
गन्धोत्कटो ब्रह्मजटो विनीतः कुलपत्रकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

तपोधना, स्त्री, (तपो ग्रीष्मकाल एव धनमिव यस्याः ।) मुण्डीरी । इति मेदिनी ॥ (तपोधने, त्रि । यथा, महाभारते । ५।१८८।२० ।
"षण्मासान् वायुभक्षा च स्थाणुभूता तपोधना ॥")

तपोवटः, पुं, ब्रह्मावर्त्तदेशः । इति त्रिकाण्डशेषः ॥

तप्तः, त्रि, (तप्यते स्मेति । तपौ सन्तापे+क्तः ।) तापयुक्तः । तत्पर्य्यायः । सन्तापितः २ दूनः ३ धूपायितः ४ धूपितः ५ । इति हेमचन्द्रः ॥ (यथा, हठयोगप्रदीपिकायाम् । १ । १० ।
"अशेषतापतप्तानां समाश्रयमठो हठः ॥")

तप्तकुम्भः, पुं, (तप्तः सन्तापितः कुम्भो यत्र ।) नरकविशेषः ॥ (यथा, मार्कण्डेये ।१४।३४-३९ ।
"अतःपरं भीमतरं तप्तकुम्भं निबोध मे ।
समन्ततस्तप्तकुम्भा वह्निज्वालासमावृताः ॥
ज्वलदग्निचयोद्वृत्ततैलायश्चूर्णपूरिताः ।
तेषु दुष्कृतकर्म्माणो याम्यैः क्षिप्ता ह्यधोमुखाः ॥
क्वाथ्यन्ते विस्फुटद्गात्रगलन्मज्जजलाविलाः ।
स्फुटत्कपालनेत्रास्थिच्छिद्यमाना विभीषणैः ॥
गृध्रैरुत्पाट्य मुच्यन्ते पुनस्तेष्वेव वेगितैः ।
पुनः सिमसिमायन्ते तैलेनैक्यं व्रजन्ति च ॥
द्रवीभूतैः शिरोगात्रस्नायुमांसत्वगस्थिभिः ।
ततो याम्यैर्नरैराशु दर्व्व्याघट्टनघट्टिताः ॥
कृतावर्त्ते महातैले मथ्यन्ते पापकर्म्मिणः ।
एष ते विस्तरेणोक्तस्तप्तकुम्भो मया पितः ! ॥")

तप्तकृच्छ्रः, पुं क्ली, (तप्तेन जलदुग्धादिना आचरितं कृच्छ्रं कष्टं यत्र । यद्वा, तप्तेनाचरितं कृच्छ्रम् ।) व्रतविशेषः । यथा, "पयोघृतमुदकं वायुतप्तं प्रतित्र्यहं पिबेत् स तप्तकृच्छ्रः ।" इति गौतमः ॥ (द्वादशाहसाध्यव्रतमेतत् । यथा, मनुः । ११ । २१५ ।
"तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् ।
प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः ॥"
"तप्तकृच्छ्रं चरन् द्विजातिः त्र्यहमुष्णोदकं त्र्यहमुष्णगोक्षीरं त्र्यहमुष्णघृतं त्र्यहमुष्णवायुं एकवारं स्नानं कुर्व्वन् संयतवान् पिबेत् । अत्र पराशरोक्तविशेषः ।
षट्पलन्तु पिबेदम्भस्त्रिपलन्तु पयः पिबेत् ।
पलमेकं पिबेत् सर्पिस्तप्तकृच्छ्रं विधीयते ॥"
इति तट्टीकायां कुल्लूकभट्टः ॥)

तप्तपाषाणकुण्डं, क्ली, (तप्तानां पाषाणानां कुण्डमिव।) नरकविशेषः । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

तप्तवालुकः, पुं, (तप्ता वालुका यत्र ।) नरकविशेषः । इति पुराणम् ॥ (उत्तप्तवालुकामये, त्रि । यथा, भागवते । ३ । ३० । २२ ।
"क्षुत्तृट्परीतोऽर्कदवानलानिलैः
संतप्यमानः पथि तप्तवालुके ॥")

तप्तमाषकं, क्ली, (तप्तं माषमितं सुवर्णादिकं यत्र कर्म ।) परीक्षाविशेषः । तद्विधिर्यथा । पितामहः ।
"कारयेदायसं पात्रं ताम्रं वा षोड़शाङ्गुलम् ।
चतुरङ्गुलखातन्तु मृन्मयं वाथ मण्डलम् ॥
मण्डलं सूर्य्यमण्डलाकारं वर्त्तुलमिति यावत् ।
पूरयेद्घृततैलाभ्यां विंशत्या तु पलैस्तु तत् ।
सुवर्णमाषकं तस्मिन् सुतप्ते निःक्षिपेत्ततः ॥